SOBHA K.M.

A CRITICAL STUDY OF KĀRAKAS WITH SPECIAL REFERENCE TO LAGHUŚABDENDUŚEKHARA, PRAKRIYĀSARVASVA, LAGHUPĀṆINĪYA, VĀKYAPADĪYAM, ETC.

लघुशब्देन्दुशेखर-प्रक्रियासर्वस्व-लघुपाणिनीय-वाक्यपदीयाद्याधारेण कारकाणां समीक्षात्मकम् अध्ययनम्

संक्षेपः (SYNOPSIS)

लघुशब्देन्दुशेखर-प्रक्रियासर्वस्व-लघुपाणिनीय-वाक्यपदीयाद्याधारेण

कारकाणां समीक्षात्मकम् अध्ययनम्

शोधप्रबन्धे कारकाणां शास्त्रीयनिर्वचनं सामान्येन प्रथमं प्रतिपादितं वर्तते। करोति क्रियां निर्वर्तयति इति कारकम् इति भाष्यकारः। कारकत्वं क्रियाजनकत्वम् इत्युच्यते। क्रियाजनकत्वमिति जन्यजनकभावघटितक्रिया-कारकभावसम्बन्धेन क्रियान्वयीत्यर्थः। कारकत्वं नाम क्रियाजनकशक्तिमत्वम् इति प्रतिपादयति। कारकादीनां साधुत्वं क्रियायाम् अन्वयो भवति। क्रियायाः संसिद्धौ प्रवर्तमानं द्रव्यशक्तिसाधनं कारकम् इत्याहुः। क्रिया धात्वर्थः। तदाह भूषणकारः-

सम्बोधनान्तं कृत्वोऽर्थाः कारकं प्रथमो व तिः।

धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ्।।

तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।

साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम्।।

कारकमधिकृत्य भर्तृहरिः एवं वदति-

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरं।

क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः।। इति।

क्रियानिमित्तं कारकमिति भोजमते। क्रियानिष्पादकत्वं कारकत्वमिति नागेशेन उक्तम्। कारकमधिकृत्य वात्स्यायनः एवं वदति-यथा एवञ्च सति न

द्रव्यमात्रं कारकम्, न क्रियामात्रम्, किं तर्हि क्रियासाधनं क्रियाविशेषयुक्तं कारकम् इति। सूत्रानुसारेण कारकाणां पठनं क्रियते इह। विषयस्य अस्य शीर्षकत्वेन कारकमधिकृत्यापि विचारः कृतो वर्तते। कारकम् इति महासंज्ञा क्रियते, संज्ञा च नाम यतो न लघीयः। तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनम्-अन्वर्थसंज्ञा विज्ञायेत। करोतीति कारकमिति रीत्या महाभाष्यकारस्य अन्येषां च आचार्याणां मतमधिकृत्य सूचना इह वर्तते। कारकस्य क्रियायां सम्बन्धो वर्तते। अतः कारकनिर्वचनवेलायां का नाम क्रियेत्यपि वक्तव्यं भवति। तदनुसारेण क्रिया साध्यस्वरूपा, क्रिया आश्रितक्रमरूपा इत्यादिरीत्या क्रियास्वरूपमपि इह प्रतिपादितम्। अखिलकारकव्यापाराभिधायी धातुः इति हेलाराजीयमतस्यापि अत्र सूचना वर्तते। व्यापाराणां प्रकृतिभेदमाश्रित्य कारकस्य अवान्तरभेदो वर्तते। सर्वाणि कारकाणि येन केनापि प्रकारेण कर्ता भवति। येन केनापि प्रकारेण कर्मादयः व्यापारे स्वातन्त्र्यं प्राप्नुवन्ति। स्वातन्त्र्यं हि कर्तुः मौलिकता। तस्मात् कारकाणां परस्परविनिमयश्च संजायते। व्यापारमात्रेण कर्तृत्वं सर्वत्र अस्ति कारके। व्यापारभेदापेक्षायां करणत्वादिसंभवः इति वाक्यपदीये साधनसमुद्देशे। एवं यद्यपि कारकशक्तिः एका निमित्तभेदेन भिन्ना। निमित्तभेदादेकैव भिन्नशक्तिः प्रतीयते। अत्र हेलाराजः-कर्तृत्वमेव अवान्तरव्यापारविवक्षया करणादिव्यपदेशरूपतां भजते इति।

कारकविषये बहवः ग्रन्थाः उपलभ्यन्ते। लक्षणकथने अर्थप्रतिपादने दृष्टान्तप्रदर्शने च यद्यपि तेषु ग्रन्थेषु साजात्यं वर्तते, तथापि प्रतिपादनवैशिष्ट्ये दृष्टान्तप्रदर्शने नूतनाशयविन्यासे च तेषां कर्तारः अवधानं दधानाः दृश्यन्ते। कारकविषयमधिकृत्य साकल्येन पठनाय ते बहु उपकुर्वन्ति। अतः प्रकरणग्रन्थस्थस्य कारकविषयस्य विशदीकरणवेलायां प्रकृतविषयमधिकृत्य लिखितानां महाभाष्योक्तानां वाक्यपदीयोक्तानां शेखरोक्तानां प्रक्रियासर्वस्वोक्तानां लघुपाणिनीयोक्तानां च विषयाणां समावेशः अस्मिन् शोधप्रबन्धे वर्तते।

किञ्च चान्द्रकातन्त्रशाकटायनव्याकरणग्रन्थोक्तानां विषयाणामपि इह यथायोग्यं सन्निवेशाय परिश्रमश्च अस्ति। एवं नानाग्रन्थप्रतिपादितविषयेण साकं साकल्येन कारकमधिकृत्य इदंपर्यन्तं न कोऽपि शोधग्रन्थः लिखितो वर्तते। तन्न्यूनतां परिहर्तुं अयं परिश्रमः।

शोधप्रबन्धस्य अस्य नवाध्यायाः सन्ति।

१. प्रथमोऽध्यायः - कारकम्, व्युत्पत्तिः स्वभावश्च।

२. द्वितीयोऽध्यायः - प्रथमाविभक्तेः समीक्षा।

३. तृतीयोऽध्यायः - कर्मकारकसमीक्षा।

४. चतुर्थोऽध्यायः - कर्तृकारकसमीक्षा, करणकारकसमीक्षा।

५. पञ्चमोऽध्यायः - सम्प्रदानकारकसमीक्षा।

६. षष्ठोऽध्यायः - अपादानकारकसमीक्षा।

७. सप्तमोऽध्यायः - षष्ठीविभक्तिविचारः।

८. अष्टमोऽध्यायः - अधिकरणकारकसमीक्षा।

९. नवमोऽध्यायः - निर्णयसंक्षेपः।

प्रथमोऽध्यायः - कारकम्-व्युत्पत्तिः स्वभावश्च।

महाभाष्यं, वाक्यपदीयं, काशिका, न्यायभाष्यं, सरस्वतीकण्ठाभरणं, परमलघुमञ्जूषा, हेलाराजीयं, वात्स्यायनभाष्यं, शब्दशक्तिप्रकाशिका, प्रक्रिया-सर्वस्वं, शब्देन्दुशेखरः, विजया-चिदस्थिमाला-विषमपदविवृतिरिति शेखर-व्याख्यानत्रयं, शब्दार्थरत्नं, संस्कृतभाषादर्शनं, शास्त्रार्थसुधा, व्याकरणप्रबन्ध-मुक्तावली, लघुपाणिनीयं, भूषणसारः इत्यादिषु ग्रन्थतल्लजेषु व्याप्तानां कारकलक्षणानां निर्वचनानां च समावेशः इह वर्तते।

द्वितीयोऽध्यायः - प्रथमाविभक्तेः समीक्षा

अत्र कर्तृकर्मादिकारकाणां विवरणं विवेचनात्मकरीत्या क्रियते। ग्रन्थान्तराणाम् अभिप्रायाः इह संक्षेपतया वर्तन्ते। लघुपाणिनीयमनुसृत्य लघुनोपायेन सूत्रार्थस्य व्याख्यानमपि इह वर्तते। प्रातिपदिकार्थः इत्यस्य अत्र सत्तार्थाः उक्ताः। पुंस्त्रीक्लीबानां लिङ्गशब्देन प्रतिपादनम् अवगन्तव्यम् इत्युक्तम्। परिमाणशब्देन द्रोणखार्यादीनां अवबोधः। एकद्विबहूनां वचनशब्देन ग्रहणम्। न केवला प्रकृतिः प्रयोक्तव्या नाऽपि प्रत्ययः इति भाष्यवचनम् आधारत्वेन स्वीकृत्य-

रासविलासविलोलं भजत मुरारेर्मनोरमं रूपम्।

प्रकृतिषु यत्प्रत्ययवत् प्रत्येकं गोपिकासु सम्मिलितम्।। इति यत् प्रक्रियासर्वस्वे नारायणभट्टपादेन उक्तं तस्य प्रपञ्चनम् इह कृतम्। एवं सूत्रद्वयं विवेचनात्मकरीत्या ग्रन्थान्तराणां सहाय्येन इह पठितं वर्तते।

तृतीयोऽध्यायः - कर्मकारकसमीक्षा

अस्मिन् प्रकरणे सिद्धान्तकौमुद्याः कारके इति सूत्रमारभ्य 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रपर्यन्तानां चतुर्विंशति संख्याकानां सूत्राणां ग्रन्थान्तरप्रस्तावेन साकम् अध्ययनं वर्तते। कातन्त्रव्याकरणं चान्द्रव्याकरणं सरस्वतीकण्ठाभरणं वाक्यपदीयम् इत्यादिग्रन्थानुरोधेन कर्मकारकस्य स्वरूपविवरणाय इह यत्नो वर्तते। लघुपाणिनीये कारके इत्यस्य क्रियायां विषये संज्ञा विधीयन्ते इत्युक्तम्। प्रक्रियासर्वस्वे कारक इति सूत्रविषये कारकेषु इत्यस्य क्रियानिर्वर्तकेषु इत्युक्तम्।

अत्र ईप्सिततमस्य कर्मणः वाक्यपदीयदिशा यत् त्रैविध्यम् उक्तं तस्य सूचना वर्तते। यथा-

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।

तत्रेप्सिततमं कर्म------------------------।।

ईप्सिततमभिन्नं तु कल्पितं भवति इति भर्तृहरेः अभिप्रायस्य विन्यासोऽपि अत्र वर्तते। यथा-

औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम्।

संज्ञान्तरैरनाख्यातं यद् यच्चाप्यन्यपूर्वकम्।।

परमलघुमञ्जूषानुसारेण कर्मलक्षणस्य प्रस्ताव इह वर्तते, यथा कर्मत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्। अकथितं च इति सूत्रविषयस्य उल्लेखः भोजकारिकानुसारेण क्रियते। यथा-

दुहियाची रुधिप्रछी चिञ् ब्रूशासीर्मथिश्च जिः।

दण्डिर्ग्रहिर्मुषिपची नीवही हरतिः कृषिः।

अत्र यथायोग्यं सर्वत्र सूत्रविषये शब्देन्दुशेखरः महाभाष्यं कारकार्थप्रबोधिनी, प्रक्रियासर्वस्वम् इत्येतानि पुस्तकान्यपि विवरणार्थम् आश्रितानि वर्तन्ते। पूर्वोक्तरीत्या अन्ते प्रवेशकान्तर्गतानां प्रकृतविषयप्रतिपादिकानां कारिकाणां विन्यासोऽपि वर्तते।

चतुर्थोऽध्यायः - कर्तृकारकसमीक्षा करणकारकसमीक्षा

इह प्रकरणमनुसृत्य कौमुदीदिशा स्वतन्त्रः कर्ता इति सूत्रादारभ्य हेतौ इति सूत्रपर्यन्तानां नवसंख्याकानां सूत्राणां भाष्यवाक्यपदीयशेखरभूषणसारपरमलघुमञ्जूषाप्रक्रियासर्वस्वादीनां ग्रन्थानां साहाय्येन समीक्षात्मकं पठनं वर्तते। किञ्च प्रकरणारम्भे कर्तृकरणयोः समीक्षात्मकम् अध्ययनम् अपि वर्तते। इहापि आरम्भे कर्तृकारकस्वरूपस्य विवरणं वर्तते।

अस्य कर्तुः द्वैविध्यम्। स्वतन्त्रः कर्ता, तत्प्रयोजको हेतुश्च। स्वतन्त्रः कर्ता त्रिधा भवति। अभिहितकर्ता, अनभिहितकर्ता, कर्मकर्ता। यथाक्रमम् उदाहरणानि च अत्र वर्तन्ते। यथा देवदत्तः पचति, देवदत्तेन पच्यते, पच्यते ओदनः स्वयमेव।

हेतुकर्तुरपि द्वैविध्यम्। प्रथमः चेतनविषयः, द्वितीयः अचेतनविषयः। दृष्टान्तो यथा पाचयति ओदनं देवदत्तेन-दानं वासयति। कर्तृकारकस्याधीनानि भवन्ति अन्यानि कारकाणि। प्रवृत्तानाम् अन्यकारकाणाम् इदं कारकं निवृत्तिं करोति। कारकान्तराणाम् अभावेऽपि कर्तृकारकस्य अस्तित्वं वर्तते। अत एव कर्तृकारकस्य स्वातन्त्र्यम्। विषयस्य अस्य प्रस्तावो वाक्यपदीये वर्तते। यथा-

प्रागन्यतः शक्तिलाभात् न्यग्भावापादनादपि
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्।
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरिष्यते।।

करणकारकस्वरूपस्य निर्वचनमपि इह कातन्त्रव्याकरणानुसारेण क्रियते। हरिमतमनुसृत्यापि इह करणकारकस्वरूपं विवृणोति। वनचरः परशुना वृक्षं छिनत्ति इति दृष्टान्तमनुसृत्य करणस्वरूपं विवृणोति। प्रकृतदृष्टान्ते वृक्षः कर्म, इह परशुव्यापारेण वृक्षस्य पतनम्। एवं क्रियायाः परिनिष्पत्तिः। व्यापारस्य

करणेन नित्यसम्बन्धो वर्तते। अतः करणस्य करणत्वं व्यापारयुक्तत्वम्। अन्यथा तस्य हेतुत्वम् आपद्येत। हेतुकरणयोः वैलक्षण्यमपि इह स्पष्टं क्रियते। क्रियायाः अश्रूयमाणत्वेऽपि सा संज्ञा यथा-अलं श्रमेण इति। इह क्रिया न श्रूयमाणा तथाऽपि श्रमेण इति करणम्। करणं खलु सर्वत्र कर्तृव्यापारगोचरः अपि च करणं विवक्षाधीनं च। अत एव स्थाल्यां पचति इति प्रयोक्तव्ये स्थाल्या पचति इति च।

पञ्चमोऽध्यायः - सम्प्रदानकारकसमीक्षा

अस्मिन् प्रकरणेऽपि पूर्वोक्तरीत्या भाष्यवाक्यपदीयप्रक्रियासर्वस्वशेखर-परमलघुमञ्जूषाभूषणसारादिग्रन्थसाहाय्येन कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रादारभ्य गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि इति सूत्रपर्यन्तानां पञ्चदशसंख्याकानां सूत्राणाम् अर्थविचिन्तनं कृतं वर्तते। अध्यायस्य आमुखत्वेन सम्प्रदानकारकस्वरूपमधिकृत्यापि विचारो वर्तते। तदर्थमपि शाकटायनव्याकरणं सरस्वतीकण्ठाभरणं कातन्त्रव्याकरणं महाभाष्यं वाक्यपदीयं चान्द्रव्याकरणं भूषणसारः इत्यादिग्रन्थतल्लजानाम् आधारत्वेन सम्प्रदानकारक-स्वरूपमधिकृत्यापि समीक्षात्मकः उल्लेखो वर्तते। कर्मणोपेयः सम्प्रदानमिति शाकटायनमतमत्र अनूद्यते। कर्मणा क्रियया वा यमभिप्रैति स सम्प्रदानमिति भोजमतस्यापि आविष्कारः अत्र वर्तते। कारकस्य अस्य दानमाहात्म्यमस्ति। कर्तृकर्मकरणाधिकरणसंज्ञाः कृधातुना निष्पादिताः। सम्प्रदानसंज्ञा तावत् दा

धातुना निष्पादिता वर्तते। आशयस्य अस्य सम्मतिः कातन्त्रव्याकरणमादाय इह स्पष्टीक्रियते। यथा-यस्मै दित्सा रोचते, धारयते वा इति। सम्प्रदाने दानकर्तुः स्वामित्वत्यागः दानस्वीकर्तुः स्वामित्वस्वीकारश्च सम्भवतः। इदं कारकतत्त्वं सनातनसंस्कारस्य आधारशिला भवति। विप्राय गां ददाति राजा इत्यत्र राज्ञः गोस्वामित्वत्यागः विप्रस्य स्वामित्वस्वीकारश्च स्पष्टतया भासते। एवं सम्प्रदानकारकं धनिकस्य त्यागमहत्वे निःस्वस्वस्वीकारार्हत्वे च निदर्शनं भवति। कारकस्य अस्य विषये दानं विनापि सम्प्रदानं वर्तते इत्येतत् महाभाष्यमुद्धृत्य केचिद्वदन्ति। यथा-खण्डिकोपाध्यायः शिष्याय चपेटां ददाति, दृष्टान्तेऽस्मिन् यद्यपि चपेटायाः तदानीम् उपयोगो नास्ति तथापि तत्फलेन शास्त्राभ्यासयोगत्वात् ज्ञानप्रदानत्वं चपेटायां निहितं वर्तते। अस्य आशयस्य प्रवक्ता भवति भगवान् भर्तृहरिः। यथा-

अनिराकरणात् कर्तुः त्यागाङ्गं कर्मणेप्सितम्।

प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम्।। इति।

षष्ठोऽध्यायः - अपादानकारकसमीक्षा

अध्यायस्य अस्य आरम्भे अपादानकारकस्य लक्षणविन्यासाय प्रयत्नो वर्तते। अपाये यत् ध्रुवं तदपादानमिति लक्षणं भोजोऽपि अङ्गीकरोति। चान्द्रव्याकरणे तावत् अपादानस्य अवधिशब्देन निर्देशः। यस्मात् अपायः भवति सः अवधिः। ध्रुवः अवधिः। सः चलनजन्यविभागस्य आश्रयः। इह

उदाहरणस्य विशकलनेन संज्ञायाः अस्याः स्वरूपं विव्रियते। यथा-ग्रामादायाति इति। अत्र आगमनक्रियायाः आश्रयः पुरुषः। अत्र आगमजन्यः यः विश्लेषः तस्य सम्बन्धः ग्रामे नास्ति अतः ग्रामस्य अपादानसंज्ञा। धावतो अश्वात् पतति इति दृष्टान्तान्तरम्। अत्र धावनक्रियाविशिष्टस्य अश्वस्य पतनक्रियां प्रति अवधित्वम्। प्रदत्तयोः उदाहरणयोः प्रथमोदाहरणं निष्क्रियस्य उदाहरणम्। द्वितीयोदाहरणं सक्रियस्य च। अपादानस्य निष्क्रियसक्रियविषये वाक्यपदीयमपि अत्र प्रमाणतया वर्तते। यथा-

अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते।।
पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ
यस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते।।
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षमवधित्वं पृथक् पृथक्।।

उपरि कौमुदीदिशा ध्रुवमपायेऽपादानम् इति सूत्रादारभ्य दूरान्तिकार्थेभ्यो द्वितीया च इति सूत्रपर्यन्तानां नवदशसंख्याकानां सूत्राणां कौमुदीकारानुरोधेन अर्थविचिन्तनं कृत्वा तत्र तत्र यथायोग्यं भाष्यम्, वाक्यपदीयम् शेखरः प्रक्रियासर्वस्वम् विषमपदविवृतिः परमलघुमञ्जूषा प्रक्रियासर्वस्वं भूषणसारः प्रवेशकं च प्रमाणीकृतानि।

सप्तमोऽध्यायः - षष्ठीविभक्तिविचारः

शेषषष्ठी कारकषष्ठी इति षष्ठी, द्वयोः शेषषष्ठी एव सम्बन्धसामान्ये षष्ठी। अत्रत्यसम्बन्धस्य बुद्ध्यवसितत्वम् अङ्गीकरोति दुर्घटवृत्तिकारः शरणदेवः।

मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः।

एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः।। इति।

आप्तश्लोकम् उद्धृत्य सम्बन्धस्य बौद्धिकत्वम् अङ्गीकरोति दुर्घटवृत्तिकारः। अत्र शशशृङ्ग-मृगतृष्णा-वन्ध्यासुत-खपुष्पादिषु सम्बन्धः बौद्ध एवेति सुस्पष्टम्। वन्ध्यासुतादीनां तत्त्वतः अस्तित्वाभावात् षष्ठ्याः कारकत्वं नास्ति इति केचित् वदन्ति। आशयस्य अस्य असमीचीनत्वं प्रत्यपि इह विचारः कृतो वर्तते। कारकप्रातिपदिकार्थव्यतिरिक्तस्वस्वामिभावादिसम्बन्धः शेषः। कर्मणि द्वितीया इत्यारभ्य प्रातिपदिकार्थलिङ्गपरिणामवचनमात्रे प्रथमा इत्यन्तं चतुश्चत्वारिंशत् सूत्रैः षट् कारकाणि प्रातिपदिकार्थश्च अष्टाध्याय्यां पाणिनिना उक्तानि वर्तन्ते। अतः शेष इत्यनेन षड्भ्यः कारकेभ्यः प्रातिपदिकार्थाच्च अतिरिक्तः स्वस्वामिभावः जन्यजनकभावः अवयवावयवीभावः इत्यादयः अवगन्तव्याः।

एवं कर्मादिकारकेषु विषये द्वितीयादयः भवन्ति, प्रातिपदिकार्थे प्रथमा भवति, उपर्युक्तस्वस्वामिभावादिसम्बन्धे षष्ठी च भवति इत्यर्थविचारः

अध्यायस्य अस्य आमुखरूपेण प्रदत्तो वर्तते। तथापि षष्ठ्याः सामान्येन कारकत्ववारणं न युक्तम्।

कृष्णस्य गमनं, श्लोकस्य पाठकः इत्यादौ कर्तृकर्मणोः कृति इति सूत्रेण कृद्योगे कर्तरि कर्मणि च षष्ठी भवति। कृष्णस्य गमनं इत्यत्र गमनाश्रयः कृष्णः कर्ता। गमनमिति कृदन्तम्। अत्र कृद्योगे षष्ठी, नो चेत् कर्तृकरणयोस्तृतीया इति सूत्रेण तृतीया प्रवर्तेत। एवं श्लोकस्य पाठकः इत्यत्र श्लोकः पठनक्रियायाः कर्म, पाठकः इति कृदन्तम्। अत्र श्लोकस्य इति कर्मणि षष्ठी। नो चेत् कर्मणि द्वितीया इति द्वितीयायाः प्रवृत्तौ श्लोकं पाठकः इत्यापद्येत।

एवं कर्तरि कर्मणि च केषाञ्चन कृदन्तानां योगेऽपि षष्ठी विहिता। सा कारकषष्ठी। एवं षष्ठ्याः कारकत्वं नास्ति इति वादस्य प्रायोवादमात्रत्वम् इह उक्तं वर्तते। उपरि कौमुदीदिशा शेषे षष्ठी इति सूत्रादारभ्य चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः इति सूत्रपर्यन्तानां चतुर्विंशतिसूत्राणां पठनं महाभाष्यवाक्यपदीयप्रक्रियासर्वस्वशेखरमञ्जूषाभूषणसारादिग्रन्थानां साहाय्येन इह निरुह्यते।

अष्टमोऽध्यायः - अधिकरणकारकसमीक्षा

अध्यायस्य अस्य आरम्भे अधिकरणकारकस्वरूपमधिकृत्य विचारो वर्तते। सामान्यक्रियायाः आधारः न अधिकरणं, किन्तु कर्तृकर्मान्तरितक्रियायाः आधारः अधिकरणमिति वाक्यपदीयमतानुरोधेन इह कथितं वर्तते। यथा-

कर्तृकर्मव्यवहितमसाक्षाद्धारयत् क्रियाम्।

उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।

नागेशस्य अस्मिन् विषये सम्मतिरपि इह उक्ता वर्तते। आधारस्य अस्य अभिव्यापकं, औपश्लेषिकं, वैषयिकं इति त्रैविध्यमुक्त्वा दृष्टान्तानां प्रदर्शनमपि कृतम्। षट् विधानामधिकरणानां कारिकामाश्रित्य उदाहरणप्रदर्शनमपि अत्र यथा-

कटे शेते कुमारोऽसौ वटे गावः सुशेरते।

तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम्।।

युद्धे सन्नह्यते धीरोऽङ्गुल्यग्रे करिणां शतम्।।

एवं सामान्येन अधिकरणकारकस्वरूपं व्यवस्थाप्य पूर्ववत् महाभाष्यादीनां ग्रन्थानां सहाय्येन सूत्रार्थविशदीकरणं वर्तते। तदनुसारेण इहापि कौमुदीदिशा ऊनशतसूत्रादारभ्य त्रयोदशाधिकशतपर्यन्तानां चतुर्दशसूत्राणां समीक्षात्मकपठनं वर्तते।

नवमोऽध्यायः - निर्णयसंक्षेपः

प्रथमाध्यायादारभ्य अष्टमाध्यायपर्यन्तानां विषयाणां संक्षेपरूपेण इह कथनं वर्तते। अत्यल्पेन आयासेन शास्त्रावबोधः प्रवेशकग्रन्थमाश्रित्य सञ्जायते इति दृष्ट्वा एकैकस्य प्रकरणस्य अन्ते उक्तलघुग्रन्थात् सरलश्लोकाः

उद्धृताः वर्तन्ते। सर्वाध्यायानां शीर्षकत्वेन तत्तत् कारकस्वरूपस्य शास्त्रीयरीत्या विचारोऽपि कृतो वर्तते।

एवं महाभाष्यं, वाक्यपदीयम् इत्यादि आकरग्रन्थानां लघुशब्देन्दुशेखरः भूषणसारः इत्यादिप्रौढग्रन्थानां प्रक्रियासर्वस्वम्, लघुपाणिनीयम्, प्रवेशकम् इत्यादिकेरलीयानां ग्रन्थानां च साहाय्येन कारकविषये समीक्षात्मकं पठनम् इह यथामति प्रथमतया कृतो वर्तते।